३ तस्यानवद्य गुणरत्न निधान भूता
भूतानुकम्प चतुरा विनयप्रवीणा
वीणा निनाद मधुरस्वर वल्गु वाक्या
श्री भोगिनीति कथितास्य बभूव देवी ३
४ तस्यां स लिच्छविकुलाम्बर पूर्णचन्द्रः
चन्द्रप्रभामिव शरन्निशि निर्म्मलायाम्
स्फीतौजसं दुहितरं जनयाम्वभूव
आत्मानुरूप विविधामल सद्गुणाढ्याम् ४
५ नाम्ना सा विजयवतीति राजपुत्री
प्रख्याता विविधकला विचक्षणत्वात्
या पत्यौ हरइव वार्त्त देव लाभे
भक्तत्वात्तदनु नयंक पेशलाभूत् ५
६ तीव्र प्रसाद जलधौतमनः कलङ्क
पुण्यक्रिया परिचयैक रसानुरक्ता
लिङ्गन्तदत्र विजयेश्वरमक्षयाय
सातिष्ठिपञ्जन मनो नयनाभिरामम् ६
७ संवत् ४०० २० ७ आषाढ शुल्क दिव १

1. DV read थो probably a misprint.

*The metre up to the 4th verse is śārdūlavikridita but the 5th is Mandakini and thereafter again śārdūlavikridita.

XIX. Chhatra Chaṇḍeśvara

(DV 21; HJ 17) A slab of stone lying to the south of the pedestal of Chaṇḍeśvara facing south. The inscribed part is 78 cm wide and 25.5 cm long.

१ ················त्रैलोक्यनाथ···········

२ ······ ·······पूर्व्वं वात वाहनस्य दक्षिणेन क्षेत्रन्दन्तम्भूमि ३५० पिण्डक मा २५५····

३ ·······१६ काष्ठमूल्यम्पण मेकैकम्प्रति दिवसं मा२····चैत्रकृष्णपन्चम्याम् ····थनृ

४ ·······पुराणाः १५ ज्येष्ठ शुक्ल त्रयोदश्यां राज्यवर्द्धनदेवस्य स्नपनमङ्ग पूजा ···

५ त्थंम्भूते दानवस्तुनि तृष्णाभिभूतमनस पापबुद्धिर्म्मा भूदिति कृत्वा मया स····

६ मस्य पूर्व्वेण क्षेत्रन्दत्तम्भूमि २३० पिण्डक मा ११० पणका-तैलघट १ राज्ञा राज्यवर्द्धनस्नपनादीनां भूमि—मा ६० इत्थमिह

७ व्ययः मा ५० उभयत्र तैलघट १ भवितारो मद्द्दूध्वं ये नृपाः कुर्य्यु रिहान्यथा·······स्तर्हि वयं·······

८ त्मना लेखितोयं क्रियाकारः स्ववंश्या ननुरक्षता

XX. Ādi-Nārāyaṇa Temple Inscription of Thankot

(Gn XII; DV 22; HJ 24) This is inscribed on a slab of stone about 30 cm wide and 76 cm long standing against the outer wall of the quadrangle of the temple of Ādi-Nārāyaṇa in Thankot village, about 6 miles west of Kathmandu. The top is damaged and completely lost. The date is *Samvat 428 Mārga śukla 1.*

The first two lines are missing in the plate. The reading, therefore, is partly conjectural.

१ ॐ स्वस्ति मानगृ [हात्परमदैवतव] प्प भट्टा

२ रक महाराज श्रीपा [दानुद्धयातो श्रुत] नयदया

३ दान दाक्षिण्य पुण्य प्र[ताप विकसित सित]कीर्त्ति

४ भंट्टारक महाराजा श्री [वसन्त देवः कुशली]

५ जय पल्लिका ग्रामे निवा[सोपगता] न् ब्राह्मण पुरस्स
६ रान् ब्रंह्य् शुल्हंमुंतेपुल·······प्रधानान्ग्राम कुटुम्बिनः
७ साष्टादश प्रकृतीन् कुश [लम्पृ] ष्ट्वा समाज्ञापयति
८ विदितं वोस्तु यथा [स्माभि][1] रायुष्मन्त्यै प्रियभगिन्यै
९ [ज] य सुन्दर्य्यै स्वसन्तानानुक्रमेण सुस्थित कोट्ट
१० [म] र्य्यादि: अचाटाभट प्रवेश्योयं ग्रामो तिसृष्टोस्य
११ [ग्राम] स्यसीमा शीताटी गुल्मकस्य पश्चाद्या नदी ततः पूर्व्वं
१२ [तः]····याव[2] त्पर्व्वत चूडिका दक्षिणतो तत एव नद्या
१३ ·······त्य पश्चिमेन दण्ड·······पजु यावद्धस्तिमार्गं सम्प्राप्तेति
१४ ततोपि च हस्तिमार्ग्गं·······[प] श्चिमतो यावन्त्पर्व्वत चूडिका
१५ पश्चिमतः पर्वताग्रस्य·······तिप्राग्राप: स्यन्दन्ते पश्चिमोत्तर
१६ णतोपि शिवक देवकुलस्य दक्षिणतः पानीय मार्गाविधि उत्तरेणा
१७ पि थेञ्चो[3]ग्रामस्य दक्षिणतः यावन्महापथः प्रागुत्तरेणापि नव
१८ ग्रामस्य दक्षिणतो मार्गं एवावधिर्य्यावत्पूर्व्वेण नदीम्प्रविष्ट इति
१९ तदे तस्मिन्ग्रामे ये प्रविष्ठाः प्रविविक्षवश्च ब्राह्मण प्रधानाः सा
२० ष्ठादश प्रकृतयस्तेषामत्र प्रतिवसतान्न केनचिदस्मत्पादोप
२१ जीविना स्वल्पाप्याबाधा कर्त्तव्या यश्चेमामाज्ञां मुल्लङ्घयान्यथा कुर्मात्कार
२२ येद्वा तस्याहं दृढन्न मर्षयिष्मामि तदेवं विदित्वात्र भवद्भि र्न्निर्वृत विश्व
२३ स्तैरकुतोभयैः स्वकर्म्मावस्थायिभिः परस्परेणा श्वासयद्भिश्च समुचि
२४ तभागभोग कर पिण्डक दानादिभिरुपकुर्व्वद्भि रनया प्रतिपाल्यमानै
२५ राज्ञा श्रवणविधेयैः सुखं प्रतिवस्तव्य इति समाज्ञापना येप्यागामि
२६ नो राजानो स्मद्वंश्या भविष्यन्ति तेप्येनामस्मद्दत्ताम्भूमि मनुमोदितुम
२७ [र्ह] न्ति यत्कारणम् बहुभिर्वसुधा भुक्ता राजभिः सगरादिभिः यस्ययस्य
२८ यदा भूमि स्तस्य तस्य तदा फलम् स्वदत्तां परदत्तां वा यो हरेत वसुन्ध
२९ राम् स विष्टायां कृमिर्भूत्वा नरकेषु प्रपद्यत[4] इति दूतको याज्ञिक
३० विरोचन गुप्तः सम्वत् ४०० २० ९ मार्गशीर्ष शुक्ल दिव १

1. DV मयायुष्मत्यै ।
   Gn (स्माभि) रायुष्मत्यै ।
2. Letters are not at all clear but DV reads [तिप] श्चिमे while Gn reads [त]······· 3. Gn थेञ्चे ।
4. Gn पच्यते but DV is right with प्रपद्यत ।

The metre used in the passage is *anusṭupa*.

XXI. A Stele of Tistung Village

(DV 23; HJ 26) The village of Tistung on Tribhuvan Highway, about 20 miles south west of Kathmandu, is approached after passing through the Khani Khola (rivulet) and then a stiff climb and descent. The stone lies in a lawn of a primary school. The date is 434 but the month and day symbols are worn away. The stone is damaged in the lower portion. The top shows in relief a discus (chakra) flanked by two conches (śankhas). The inscribed part is 28.5 cm long and 29 cm wide. H. Sakya has published the text with a wrong reading (Abhilekha Prakāśa, p. 7), which DV claims to have corrected.

१ [स्व] स्ति नैपालेभ्यः परमदैवंत श्रीबप्प........[1]
२ [पादानु] ध्यात भट्टारक महाराज श्रीवसन्तदे [वः]
३ [कुशली] [तेष्ठू] ङ्ग ग्रामे निवासोपगतान् प्रधान (पुर)
४ [स्सरान्कुट्टम्बि] नः कुशलभमिधाय समाज्ञापमति
५ [विदि] तमस्तु वो यथा
6 to 9 lines are worn away.
१० ....सर्व्वदण्डनाय[क]
11 to 14 lines are also missing.
१५ संवत् ४०० ३० ४

1. DV [भट्टारक] ।

XXII. Bahalukhatol (Patan) Inscription

(DV 24; HJ 29) A slab of stone near the temple of Triliṅgeśvara in Bahalukha locality, Patan bears this inscription. The date is *435 Dvitīyā* (*Second*) *Pauṣa śukla diva 5*. The inscribed part is 9 cm wide and 33 cm long.

१ ॐ स्वस्ति मानगृहात्........
२ महाराज श्रीपादा [नुध्यात] श्री [वस]
३ न्तदेवः कुशली........
४ धिकृतान्प्रेषणे........

५ त····स्त········

६ ·························

७ ··········· ·········तद····

८ न················क्षेत्र

९ द्दत्त ···· ···· ···· शे चत्वारिम्शंतो भूमिः

१० तत्रै .... प्रदेशे दशानाम्भूमिः ह्लीम्

११ को प्रदेशे विम्शतो भूमिः गुडन्दुलुन्त्तर प्रदेशे षण्णाम्भू

१२ मिः तदासां पिण्डकं १४२ तदेवं विदिता [र्त्थैन्नक] थं

१३ ञ्चिद्युष्माभिरस्मत्पादोपजीविभिरिय माज्ञा विलङ्घ्य

१४ यितव्या यश्चेमामाज्ञामुल्लङ्घ्म स्मरयेत्स्मारयेछा त

१५ स्याहं यथोचितं मर्यादा वन्धमनुष्ठा स्यामीति समाज्ञा

१६ पना इतकोत्र सर्व्वदण्डनायक महाप्रतिहार रवि

१७ गुप्त इति संवत् ४०० ३० ५ द्वितीय पौष शुक्ल दिव ५

XXIII. Jaisideval Stone Inscription

(BLI 3; Gn XIII; DV 25; HJ 27) A slab of stone of which the inscribed part about 42 cm wide and 57 cm long is standing near the sanctuary of Lhugal Devī not far from the Jaisideval in the southern part of the city of Kathmandu, which is known as Lhugaltole. The top of the stone is carved showing a chakra flanked by two śankhas. Date: *Saṃvat 435 Aśvayuja* (*Āśvina*) *śukla diva 1.*

१ ॐ स्वस्ति मानगृहात्परनदैवत बप्प भ

२ ट्टारक महाराज श्रीपादानुध्यातः श्रुतन

३ य दया दान दाक्षिण्य पुण्य प्रताप विकसि

४ तसित कीर्त्ति भट्टारक महाराज श्रीवसन्त

५ देव[1]: कुशली [चतु[2]] र्व्वधिकरणेषु धर्म्म

६ स्था[3]···· ························णिकाञ्च कुश[4]

७ [लम्पृष्ट्वा समाज्ञापयति][5] विदितमस्तु वो मया

८ ································लिग्वल[6]

९ ....कूथेर

१० ......[मधिक] रणाय[7]

११ ....[भ] ट्टारक[8]

१२ ....व्य[9] तेषान्त्र

१३ ....दिकार्य्येषु[10] सद्वै

१४ ....मयापि तेषाम्

१५ ....मोचित........

१६ ....

१७ [अस्मत्पा][11] दोपजीविभिरिय [मा][12]

१८ [13]............यश्चे मामाज्ञा मुल्लङ्घ्य............

१९ ....तस्याहं[14] दृढं मर्य्यादा[15] [वन्धमनुष्ठास्या]

२० [मीति][15] समाज्ञापना संवत् ४०० ३० ५ [श्राश्व]

२१ युजि शुल्क दिव १ दूतकः सर्व्वदण्डना

२२ यक महाप्रतिहार रविगुप्तः[16] इति

२३ ब्रहमुडि च महीशीले व्यवहरतीति

1. BLI सेनः।
2. This does not occur in BLI.
3. BLI स्था [न]।
4. BLI णेकाश्च।
5. Not in BLI.
6. BLI लिखल।
7. BLI omits.
8. BLI omits भ।
9. BLI शष्ये।
10. BLI दिकार्येषुसद्वि।
11. Not in BLI.
12. DV [माज्ञा विल]।
13. BLI तस्याहं।
14. DV further वन्धुनुष्ठास्या।

15. DV [मीति]।

16. DV just गुप्त।

XXIV. Sitāpaila Stone

(DV 26; HJ 25) A slab of stone in Sitāpaila, a village about 2 miles west of Kathmandu. The inscribed part is 20 cm wide and 36 cm long. The inscription is dated Samvat 435 without a month and day. It is a charter issued by Vasantadeva.

१ ....

२ ....श्री बप्पभट्टारक पादानुध्यातो.........

३ ....[महाराज] श्री वसन्तदेवः कुशली.......

४ यथा प्रधाना ङ्ग्राम कुटुम्बिनः [कुशल]

५ [मभि] धाय समाज्ञापयति विदितमस्तु

६ ....परमदैवत श्री वप्प भट्टारक पा (दानुध्यातः)

७ ....युष्मदीयग्रामः पूर्व्वेण तोत्तर

८ ....[पर्व]त शिखरात् दक्षिण पश्चिमदेशे.......

९ ....मार्ग्गात्पश्चिमेन राजभूमे.......

१० ....रमुत्तरेणापि हारागुङ् शिखर.......

११ ....र पूर्व्वमेव यथा..........

१२ ....[आयुष्म] त्या प्रिय भगिन्या

१३ ....जयसुन्दर्या..........परमदैब [त]....

१४ ....वप्प भट्टा [रक पादा] नामात्मनश्च श्रे

१५ [यसे]..........पश्चिम........ ..प्रणालयाः खण्डफुट्ट

१६ ....प्रतिसंस्कार..........डुलुसिञ्जु

१७ ....पञ्च.............दत्तो दूतकश्चात्र

१८ [स] र्वदण्ड नामक महाप्रतिहार रवि [गुप्तः]

१९ ....व्यवहरति संवत ४०० ३० ५[1]

1. DV omits 5 although the symbol for 5 is clear.

XXV. Kisipidi Inscription

(L 6; Gn XIV; DV 26; HJ 29) A slab of stone with inscribed part, about 38 cm wide and 22 cm long, in the village of Kisipidi near Thankot. Date: *Samvat 449 Prathamāṣāḍha śukla 10.* The first few lines are damaged and except a few all letters are not legible but the last eight lines can be read in toto.

The first few lines are totally worn away. The line numbers are for readable ones.

१ ····धिकरणेन पीडा करणीया कूथेर[1]
२ ····करणमात्र तदुभय मेतद्भ[2] [व] ····
३ प्रतिमुक्ता इत्येवञ्चावेत्य[3] यूयमद्याग्रेण स
४ मुचितकरं ददन्तः सर्व्वकृत्येष्वाज्ञा विधे [याः]
५ सन्तो निरुद्विग्न मनसो[4] यथासुखं प्रतिव [स्तव्यमिति][5]
६ इतकश्चात्र सर्व्वदण्डनायक महाप्रतिहार
७ रविगुप्तः श्नि संवत् ४०० ४० ९ प्रथमाषा [ढ]
८ शुक्ल दशम्याम्

1. Gn keeps the space vacant upto कुथेर ।
2. The lines 1-2 do not find place in Levi. Gn मेतद्भव ।
3. Gn could not decipher letters before यूयम ।
4. Gn has blank space before मनसो ।
5. DV प्रतिवसतेति ।

XXVI. Khapinchetol Inscription

(DV 28; HJ 31) On a water reservoir of stone attached to the western wall of a large courtyard in Patan known as Khapinche near Chyasaltol to the north east of the old Royal Palace. The inscribed part is 69 cm wide and 7.5 cm long. The date is Samvat 452. The record is devoted to Vaiśampa-

yana (Vyasa's disciple), suggesting that the Harigaon Pillar inscription might be contemporary.

१ ॐ स्वस्ति महर्षौ वैशम्पायने श्रद्धये····[संवत्]४०० ५० २ पौषशुल्क
तिथौ तृतीयस्याम्भट्टारक महाराज श्रीवसन्तदेवे सम्यग्राज्यम्प्रशासति
२ याज्ञिक विप्रसेनेन वेदकृताम्नाय भगवते कारणपूजार्थम्ब्राह्मण ध्रुवसेनेन
दत्तन्दक्षिण कोलिग्रामे भूशतद्वयम्पिण्डकञ्च [1]व्रिहिकस्य मानि
३ कया १५० ब्राह्मण वृद्धिषेणेन पिकङ्कूलक प्रदेशे मालार्थं पिण्डक
मानि ७ याज्ञिक वेद भट्टेन दत्तं [2]दुंलम्ग्रामे भू ४० पिण्डक १२

1. DV adds [व्री] to correct the mistake.
2. DV reads 30, which is wrong.

XXVII. Satyanārāyaṇa Pillar Inscription

(L 4; Gn XI; DV 35; HJ 23) A pillar standing in front of the western door of the temple of Satya Nārāyaṇa in a north-west suburb of Kathmandu, called Harigaon. The inscribed part is about 30 cm wide and 134 cm long. The date of this inscription is in the damaged portion; therefore is missing, but its characters indicate that 'the inscription belongs to the reign of Mānadeva or at the latest, of Vasantadeva' as Gnoli thinks. Gnoli further says: 'The text consists of thirty-four stanzas. The metre of the stanzas 1-9 seems to be the śloka (anustupa). The few remaining syllables of stanza 10 did not enable me to identify its metre. Stanzas 11-20 are in upajati. The 21 is in rucira. Stanzas 22-25 are in śikhariṇī. Stanzas 24-25 are in praharṣiṇī. The stanza 26 is in manjubhāsinī. Stanzas 27-28 and 32-34 are in mālinī. Stanzas 29-30 are in śragdharā. The stanza 31 is in rucirā.'

१ ··· ···· ···· ··· ···· ··· सयतात्मने
२ ···· ···· ···· ···· ···· ···· धिय्रैष ते नमः
३ ···· ···· ···· ···· ···· ···· त्प्रतिदेह निवृं[1][तः]

४ .... विकीर्ण्ण भानुना
५ ... . सर्व्वमात्मनि
६ .... शिनीवकान्तरा
७ .... म येन तेजसा
८ ... ... सवितेव ।सते
९ .... पथेनसौ[2]गताः
१० .... गिराम्पति र्भावैः
११ .... स्तर त्रयी त्वया
१२ .... धार्यते
१३ .... न वारणेन
१४ .... त्वया वैरुग्नम्
१५ .... मिद प्रबुद्ध
१६ .... मतिमता म्ब्रजेयुः
१७ .... मातर्ण वं[3] ....
१८ .... तये तना मुद्वीक्षया .... मित्थम्
१९ .... करणादृतेन[4] नित्यम्पृथुमतिना............
२० .... किमिह स्वस्ति वाच्यशेष........कथितन् विद्या
२१ .... परान्नास्तिकताम्प्रपन्नै स्त्रयी भिरोधिर[5]....मांण
२२ ... धर्म व्यवस्थाप्यत नाद्य लोके धर्म्मा धर्त्ता त्वमस्यो[6] यदिना भविष्यः
२३ .... वेदं व्यविकीर्ण्ण वाक्त्वादनादिनिष्ठम्............स[7] च
२४ .... कथं वेद श्हा भविष्यत्वम्भारतादिं यदि ना [र च] ष्यः
२५ (प्र) माण शुद्ध्या विदितार्थ तत्त्वः प्रकम्प्यमानम्[8].......स्वनिष्ठैः[9]
२६ ....[ध] र्म्ममित्थं जगतो हितैषी नप्रातनिष्पद्यति[10]........
२७ ....र्व्यमात्रा श्रयणादभीक्ष्णं कुतार्क्किकैस्त[11].... ....णम्
२८ ....व्यचैषीन्न पृथक्प्रमाणं कथन्तदस्यातुमिदं........यः
२९ ....प च प्राण वियोगहेतु[12]र्न्न प्रत्यवायो............थैषा[13]
३० ....त्वमेव प्रतिर्वेत्सि सम्पन्न वेदितान्यो भुविकश्चि [द]स्ति
३१ स्तुति स्यानुवादतो वा स्तुत्येषु वांचा द्वितय[14]....

३२ [स्तु] निर्गुणानां विधिना न सन्त्वान्न चानुवाद स्त्वयिर····

३३ ····न धर्म्मं सकलं न्यहिंसित्त्व नैवरागादिरयं न्य····[15]

३४ ····षिणीं वैर्धयकीञ्च तृष्णां विधूय शुद्धस्त्वमितिप्र····

३५ ····कामाद्य विविक्तरूप यदि व्यवारिष्यते········[16]

३६ ····स्मृतीनामागतेः श्रुतीनां तदेचलोके नियतां व्य····[17]

३७ [वि] पाद्य मोहानमृतं व्यसृक्ष त्स्वयञ्च धर्म्मादि जगत्यतिष्ठय····[18]

३८ ····यीत्वयागाज्जगति प्रतिष्ठा न्त्वमेव धम्मं विविधान तिष्टिप[19]

३९ ···रभ बन्दुष्प्रतिपाद मेतत्स्वर्गादि शब्दो पनिबन्ध मात्रम्

४० ····यदस्तीति जनो ग्रहीष्यद्मवानिहेवं यदि न व्यनेक्ष [त्][20]

४१ ····ता कुमतिभिरंहसा वृतैः कुतार्क्किकैः कथमपि सौगतादि भिः[21]

४२ ···त्व यिप्रथितगिरि प्रभावे यम्पयो निधौ सरिदिव विन्दति स्थितिम्

४३ ········द विनियत पदार्त्थाद्यनुगमान्तव श्रुत्वा काव्यम् सपदि मनसागम्य··········

४४ ····रत्यर्त्थत्वाद[22]····परमात्थनुिसरणेदधात्युच्चैम्मोंहं सपदिगत विद्येष्व-[23]
नियं····

४५ ····शास्त्रे मनुयम बृहस्पत्युशनसां विधानं कृत्यानाम सुगम पदं लोक····[24]

४६ ····नैवं प्रतिविषयमाधूय निपुणम्फ लेनैवाशेषं न्त्वमिद मम····

४७ ····न्नृप चरितानुवादि भावात्पादादेः प्रतिनियतन्ततश्च काव्य [म्][25]

४८ ····रनुकथनादपीह शास्त्रं त्वं शक्ते रिदमपि भारताद्य कार्षीः

४९ ····स्व भवजलधौ विवर्तमाना रागादिप्रपतधियः प्रगाढ़ मो हा[त्]

५० ···यास्त्विमिति विधाय मुक्तिमार्ग्गं साचीनाम्भुवि पुरुषान्करोषि मन्त्रे

५१ सु (खिना)[26] विविक्त वचसा त्वया सता कृपया परात्थं विनिवेशि बुद्धिना

५२ ज [ग] तो हिताय सुकृतेह भारते भुवि वाङ्मयं सकलमेव दर्शितम्

५३ विदित विविध धर्म्मो वेदिता वाङ्मयानान्निर वधिक मित्थ्या शान्तरागादि दोषम्[27]

५४ ···रवपरात्थंस्तद्भवांमोहजाल न्तिमिरमिव विवस्वानंशुभिः प्रक्षि[णोति]

५५ प्रतिविषय नियोगात्पालकत्वाच्च तासान्निपुण तदव बोधात्तद्विवेंका ददोषा त्

५६ जगति तदुपदेशान्त्वंमिथ स्तद्विभागा दुपहित[28] इव मूर्त्तिस्थ्यात्मना मत्र वाचाम्[29]

५७ सौक्ष्मा[30] द्‌ दुर्ब्बोधमीशं स्थितमपि सकलं लोकमावृत्य तत्त्वा वाग्बुद्धयो रप्यतीत

५८ ····[31]मपि मुनिभिः स्वागमाद्ध्यातत्तत्त्वम् विद्यारूपं[32] विशुद्धे[33] पदमनतिशय

५९ क्षीण संसार बन्धम् स्यादात्मानन्न जातु त्वमिव कथयिता कश्चिदन्यो द्वितीयः

६० प्रत्याधार स्थितित्वात्पृथगपिन पृथक् तत्स्वरूपा विशेषात् नित्यं धर्म्मैरयोगा

६१ त्पुनरपि न तथा सर्व्वकालेःप्रतीत : नाशोत्पादाद्ययोगा त्स्थितमपि

६२ जगतः सर्व्वगं व्यापि भावात् चैतन्यं रूपपक्ष स्थितमपि कथये

६३ त्को नु लोके त्वदन्यः निरंहसन्दुरितभिदं विवेकि नंतमोमुषंशमि

६४ तभव विपश्चितं गिराम्पतिं सुधियम ङ्गी चेतसंमयोदि

६५ तं वचनमुपैतु ते सदा शमित भव भयेन क्षायिणा ज्ञानराशेः

६६ स्वयमुपहित धाम्ना वेद्यपारङ्गतेन जगदपरजसेदंतत्त्व

६७ या सर्व्वमारा द्वियदिव तिमिराणां क्षायकेनावभाति

६८ गुण पुरुष विवेक ज्ञान सम्भिन्नजन्मा व्यतियुत विषयाणां त्वं

६९ गिरां संविवेकी जगति घनविरूढ व्यापि सम्मोह भेदी च्युतजग

७० द निरोधः खे शशीव चकाः सिः तदहमिति नुनूषद्भिन्न संसार

७१ वन्धम् वितमसमरजस्कं त्वाङ्गरीयां समाद्यम् कथमपि पर[34]

७२ लघ्वीं स्वान्तिवध्नामि वाचं तदिह पितरि मे त्वं सम्पदस्संविधत्स्व

७३ भगवतो द्वैपायनस्य स्तोत्रङ्कृत[35] मनुपरमेण

1. वृं in Gn, DV. 2. L सौगत । 3. DV भवार्णवं···न···वि दा···भञ्जत् but the letters are quite illegible; Gn मार्त्तण्ड; L omits the line. 4. L [क]रण···गेन । 5. DV स्त्रथी विरोघेन निवार्यमाणः। However the reading is marred by the letters being damaged. Gn स्त्रयैनिरोधिभिर; L reads स्त्रयैनिरोधिभिर··· । 6. Gn घर्मविरत्ता-ढयो; DV स्या । 7. Gn as in our text but DV निषम [वचसा] । 8. L माणम् । 9. L स्थ । 10. DV यदि । 11. DV द्वि [निवार्यमाणाम्] ।

12. DV यदिनान्य । 13. L ष्ठ । 14. DV reads onwards as [म्प्रवृत्तम]; L द्वितया । 15. DV [भान्सी] । 16. L omits व्यवरिष्यत and letters following. 17. DV न्यस्यत् । 18. L व्यतिष्ठत । 19. DV प । 20. L व्यतिष्ठत । 21. L सौगतैर । 22. L [नर्तत्वाहृन] । 23. Gn धैन्य… अ. इ. । 24. L नामच…पदाम् । 25. L पाठादेः । 26. Not in L 27. L अमिथ्याचाङ्कुरादिदोषम् । 29. L श्यात्मनामंत्रवाचम् । 30. L, Gn सौक्ष्या । 31. DV (कृति) । The letters are damaged but क is clear. 32. DV माद्यात । 33. L विशुद्धेः । 34. L and DV read पर but Gn परि । 35. The metre as Gnoli says is अनुष्टुप in the beginning 1-6 and उपजाति from 7-20.

XXVIII. The Āryaghāt Mandala Inscription

(DV 29; Gn LXXXVII; HJ 30) The periphery of a raised *Mandala* by the side of the temple of Vatsalādevī in the vicinity of Āryaghāt below the temple of Paśupati. The part inscribed is about 60 cm wide and 2.5 cm long and is just one line.

१ ॐ संवत् ४०० ५० २………सर्व्वदण्ड नायक पादानुध्यातो (ध्यातेन)[1] ब्राह्मण पुण्यगोमिना स्वपुण्याप्यायनाय पार्त्थिवशिला स्थापिता धान्य पिण्डक मा ३०

1. As DV has corrected the grammatical mistake, ध्यातेन seems to be right, perhaps ध्यात a mistake of the engraver.

XXIX. Chowkitar Inscription

(DV 31; Gn XV; HJ 33) A slab of stone with inscribed part about 41 cm long and 36 cm wide lying in an open field called Chowkitar to the right of the so-called Thado Dhungo in a field below the Dahachok ridge in the Thankot area. On the top there is a relief of a chakra flanked by two śankhas. Date: *Samvat 454 Jyeṣṭha śukla 7.*

१ ॐ स्वस्ति मानगृहा त्सम्यक्प्रजा पालन तत्पर
२ भट्टारक महाराज श्रीवसन्तदेवः कुशली…………
३ पुरः सरान्ग्राम कुटुम्बि [नः] कुशलम्पृष्ट्वा (समाज्ञा) पयति
४ यथा मयै……ञ्च…………ङ्ग……[शोल्ल] कू [थे]
५ राधिकरणाभिलेख्यकैश्च पञ्चापराध ……सर्व्वदण्डना
६ यक महाप्रतिहार रविगुप्तेन विज्ञापिते [न] त्रैव सर्व्वदण्डनायक
७ महाप्रतिहार रविगुप्तेन महाराज महा सामन्त श्रीक्रमलीलेन च साकं स
८ मवाप्य तथेति प्रसादः कृतस्तदित्थम्प्रति यदि कश्चिदस्मत्पादोपजी [व्य[
९ न्यो बे मामाज्ञा मुत्क्रम्याभिलेख्यं प्रवेशयेद् य श्च पञ्चापराधेन स्मरेत् स्मार
१० येद्वा तानहं दृढन्त मर्षयिष्याम्येवं[1] विदितार्था यूयं निर्वृत विश्वस्ता
११ सुखं प्रतिवसतेति ततो ग्रामीणैरपि मा भू द्राजकोशस्या पहानिरिति
१२ तत्प्रतिमोचनाय स्बे स्बे ग्रामेधिकरणयो रूभयोः क्षेत्रं दत्तम्पश्चि
१३ मोद्देशे भूमि ७ पिण्डकम् शोल्लाधिकरणस्य मा २ कूथेराधिकरणस्य
१४ मा १ दूतकश्चात्र सर्व्वदण्डनायक महाप्रतिहार रविगुप्तः ब्रह्म ुङि च
१५ प्रतिहार भवगुप्ते व्यवहरतीति सम्वत् ४०० ५० ४ ज्येष्ठ शुक्ल दिव ७

1. DV मर्षयिष्यामि एवं ।

XXX. Bhasmeśvara Inscription

(DV 34; HJ 37) Around the base of a śivaliṅga known as Bhasmeśvara in a sanctuary just to the south of Paśupatinatha across the road to Aryaghat. There are more śivaliṅgas including that of Bhasmeśvara placed close to one another. The date is 455 Chaitra śukla diva 10. The inscribed part is 80 cm wide and 11.5 cm long.

१ ॐ संवत् ४०० ५० ५ चैत्र शुक्ल दिवा १० भगवतः पशुपतेः क्षेत्रे स्वयम्प्रतिष्ठापितेभ्यो भद्रेश्वर नाथेश्वर शुभेश्वर
२ स्थितेश्वर रवीश्वरेभ्यः पञ्चभ्यः कारणपूजानिमित्तं खण्डफुट्ट प्रतिसंस्कार निमित्तञ्च प्रतीहार ध्रुवसङ्घ वार्त्तेन ।

३ स्वपुण्याप्यायनार्त्थम्मातापित्रो श्चनुग्रहार्त्थञ्च स्वजन गोष्ठिकाधीनां[1]
कृत्वा यूपग्रामस्य दक्षिणेन सर्वेद्येक्षेत्र
४ न्दत्तं भूमि ४०० पिण्डकञ्च मा ४००

1. DV नं ।

XXXI. Narke Mahadeo Base Inscription

(DV 36; HJ 39) Around the base of a śivaliṅga lying in an open field in a village called Gairigaon, a little north of Budhanilakantha shrine. The stone is damaged and some lines are not readable. The date symbols have disappeared. The inscribed part which is visible is 17 cm long and 105 cm wide. The name of the king, however, can be traced. But where to place this inscription in chronological order is a problem. Our placing here should not be taken as final. Epigraphy does help us much in this regard.

१ ....भट्टारक महाराज श्रीमनुदेवे राज्यम्प्रशासति
....
२ ....विधिवत्तदस्याश्च कारण पूजाबलि
भोजन निमित्तन्ते.......................
३ ....राज्येविशुद्धमनुजे मनुदेवनाम्नः पादप्र
बुद्धकमलद्वितय प्रसादात्
४ ....संस्थापितात्र विधिवत्प्रतिमा विचित्रा
शम्भोर्गुणाधिकतया क्षि........आहरन्ती भास्वद्विचित्रमणिरत्न
विभूषणाढ्या
५ ....
६ ....नाल्पोमि बित्तविभवे मनसापि चार्य्यः*

*The metre is Śārdūlavikriḍita.

XXXII. Sankhu Inscription

(DV 37; HJ 38) The pedestal of an image placed in the courtyard of a water conduit called Dhungahiti in Sankhu, a village 7 miles north-east of Kathmandu. Date: *460 Jyeṣṭha śukla aṣṭamī*. The inscribed part is 44 cm wide and 12 cm long.

१ ॐ स्वस्ति संवत् ४०० ६० ज्येष्ठ शुक्ल दिवा अष्टम्याम् भट्टारक महाराज श्रीवामनदेवस्य (साग्रंवर्षशतं)
२ समाज्ञापयतो भगवतो वामन स्वामिनः क्षेत्रं लेंदुप्रदेशे भूभि १०० पिण्डक मा ५०..............
३ सुब्रंकोप्रदेशे भूमि ४० पिण्डक मा २६ शटम्मि भूमि १० पिण्डक मा ४....
४ गम्मे भूमि १० पिण्डक मा ४ मिङ्कोभू ६० पिमा ५० भूमि ५ पिमा ३*

*The underlined represents later addition.

XXXIII. Paśupati Śivaliṅga base of Ābhirī, wife of the son of Paramābhimānī

(Gn XVI; DV 38; HJ 40) The base (*Jalahari*) of Śivaliṅga, with inscribed lines, is about 86 cm wide and 17 cm long, lying near the southern outer gate of Paśupatinātha below the Koṭiliṅga sanctuary. Date: Samvat 402 Jyeṣṭha māsa tithau 2.

१ ॐ आभीरीख्यातगुण भार्य्या परमाभिमानिनः सूनोः पुण्यविवृद्ध्य भर्त्तु र्देवत्वमितः प्रयातस्य पुण्येह निधननिचयं द्विजजनमभिपूज्य दानमानाभ्यां
२ पुत्रेणानुज्ञात (ता) चकार संस्थापनम्शम्भोः दत्वा चाक्षयनीवीम्व प्रपरिच्छद विभूषादीन् अनुपरमेश्वर संज्ञाञ्च शम्भोर्भुवन [1]सहितस्यास्य
३ भगवते देवदेवायास्मै स्ययम्प्रतिष्ठापितायानुपरमेश्वर संज्ञितायाभ्यङ्ग स्नपनार्च्चन गन्धधूप वलि निवेदनादि प्रवर्त्तनात्थं खण्डफुट्ट प्रतिसं
४ संस्कारात्थंञ्च पतिदेवप्राणाभीरी गोमिन्या पतये[2] त्रिदिवस्थाय पुण्याप्यायनार्थं मायुष्मताञ्चा पत्यानाम्भौमगुप्तादीनाम्भोगारोग्यायुरानन्त्यावाप्तये

५ वेम्पाग्रामे स्वयपुपारोपित नदीक्षेत्त्रं खण्ड द्वयं दत्त मिति । सम्वत् ४००
६० २ ज्येष्ठमासे तिथौ द्वितीयायाम्[3]

1. DV म ।   2. Gn पुण्याभी री भगिन्यापत्तये ।
3. The metre first आर्या then उपजाति ।

XXXIV. Śivaliṅga base near the Āryaghāt bridge

(Gn XVII; S.S. 2/1.2.3; DV 39) Base of a linga by the side of the ascent to Mṛgasthali (Deer Park) not far from the bridge over the Bagmati across Āryaghāt. The inscribed part is about 44 cm long and 44 cm wide. Date : *Samvat 467 Vaiśākka śukla 15.*

१ ॐ स्वस्ति सम्वत् ४००[1] ६७ वैशाखे शुक्ल दिव पौर्ण्णमास्याम्भट्टारक महाराज
२ श्रीरामदेवस्य साग्रं वर्षशतं समाज्ञापयति महाराज महासामन्त
३ श्रीक्रमलीलः कुशलीः भगवतः नाथेश्वराय मानमत्या दत्तं दोव
४ ग्रामोद्देश[2] शालगम्बिक्षेत्र पिण्डक मा २८ तत्र देशे खुड्डस्वामिनः
५ दत्तम्[3] मा २

1. Gnoli reads 9; DV reads 7.
2. DV ग्रामोद्देशे ।
3. Gn दत्तु ।

XXXV. Lagantole Avalokiteśvara base

(Gn XVIII; S.S.I. 9; DV 40; HJ 42) The pedestal of an image of Avalokiteśvara in the courtyard of a water conduit lying half way between Lagantole and Bhimsen Tower. The inscribed part is about 77 cm wide and 12 cm long. The date portion is damaged. The inscription belongs to the reign of Rāmadeva.

१ ॐ स्व [स्ति]………………[भट्टारक महारा] ज श्री [राम] **देवस्य** साग्रम् वर्षशतम् समाज्ञा [पयतः]
२ सर्व्वसत्वहित सुखात्र्थाय भगवत आर्या [व] लोकितेश्वरनाथ प्रतिष्ठापितः देय धर्म्मोयं परमोपासक मणिगुप्तस्य
३ भार्यया महेन्द्रमत्या सह यदत्र पुण्य तद्भवतु मातापितृपूर्व्वंङ्गमंकृत्वा सर्व्वसत्वाना सर्व्वाकार वरोपेत
४ [तथागत स] र्व्वज्ञानावाप्तये

XXXVI. Bharavi's Inscription of Harigaon

(DV 47; HJ 43) A slab of stone originally in Harigaon on the same spot where Amśuvarmā's stones lie. But now it is in the collection of National Museum. Date: *Samvat 472 Phalguna śukla 12*. The stone was lost to public view for a long time. But now it has been rescued out of private possession and kept in the Museum by efforts of Śrī Kaisar Bahadur K.C. The metre used here is Śārdūlavikridita.

१	संवत्	श्रीमान् प्रभुश्च न च लोकविरुद्धकारी रूपान्वितश्च न च रूपमदम्बिभर्ति
२	४७२	सम्पन्नपोरुषबलश्च बहुक्षमश्च दाता च नाम न च दानविकत्थनश्च
३	फाल्गुण	तेनैवमादिगुणराशिसमन्वितेन श्रीमानदेवनृपतेर्दुहितुस्सुतेन[1]
४	शुक्लदि (व)	सुस्वादुशीतलविशुद्धजलाभिरामा कीर्त्तिः कृतेयमिह भारविना न [वीना]
५	१२	

1. DV reads नृपतेद्र्दुहितु ।

XXXVII. Pharping Kochhutol Inscription

(DV 42; HJ 44) A slab of stone placed in a private garden leaning on a wall in the village of Pharping by the side of the

main road. The inscription is damaged in the beginning lines but not wholly. The date symbols reveal 479 Vaiśākha kṛṣṇa dvādaśyām. The inscribed part is 18 cm wide and 42 cm long.

············यकारिभिज्ञेय ·······
········तेन महाप्रतिहार सर्व्वदण्डनायक [भौम]
गुप्तेनविज्ञापितेन मयातामेव······
करणार्थमेवो·······र्म्मवर्गाय प्रसाद [शिला]
प ट्टकं शासनमेवं[1]
···केनचिदप्य···
···स्तामाज्ञामप्रमाणीकृत्यान्यथा कुर्यात्कारये [द्वा]
········तमहमतितरान्न मर्षयाम्यस्मिश्च········
········राज्ये ये मदूर्ध्वं राजानो भवितारस्तै
रपि·······कृत प्रसादानुवर्त्तिभिरिय········
········यत्यस्मिश्च प्रसाद
·······[महा] प्रतिहार महासर्व्वदण्डनायक
[भौ] मगुप्तः संवत् ४०० ७० ९ वैशाख मास कृष्णपक्षे तिथौ
········द्वादश्याम् ॥ ॥ अर्द्ध
····पन्नदी अर्द्धा भूय वुन्लुनदी [दक्षिण] अर्द्धे········
····दक्षिणेन मिंदिचो भूय खाह्निचो भूय········
भूय·······भूय तेग्वङ्गतो दक्षि [ण]
········पश्चिमेन केखा भूय····
···············भूय····अर्द्धचोभूय त्रेम्गुंचो पश्चि
··············मन्तरेण मोगुं चो भू········
·············· भूय पश्चिमेन···· ··
··············तिलमकमिति·······

1. DV omits मेवं ।

XXXVIII. Another Chowkitar Inscription

(Gn XIX; DV 44; HJ 47) A slab of stone with inscribed space about 35 cm wide and 49 cm long lying in a deserted village called Chowkitar to the right of the so-called Thado-

dhungo below the Dahachok ridge in the Thankot area. The top of the slab is decorated with a relief showing chakra and two śankhas. Date: *Samvat 482 Āśvina śukla pratipadā.*

१ ॐ स्वस्ति मानगृहाद् बप्पपादानुध्यातो भट्टारक म
२ हाराज श्रीगणदेवः कुशली शीताटिकातले टेग्वल् [ग्रा]
३ मे[1] यथाप्रधान ब्राह्मणपुरस्सरान् सर्व्वानेव कु
४ टुम्बिनः कुशलम्पृष्ट्वा मानयति पूर्व्वराजभिर्य्यु
५ ष्माकं कुथेर शुल्यधिकरणाभ्यान्न प्रवेष्टव्यमित्य
६ नुग्रहः कृतकोधुना मया सर्व्वदण्डनायक
७ महाप्रतिहार श्रीभौमगुप्तानुज्ञापितेन लिङ्ग्वल्
८ माप्चोकाधिकरणाभ्यां पञ्चापराधद्वारेण च
९ तुर्भिरप्यधिकरणैर्न्न प्रवेष्टव्यमिति स्थितिपट्ट
१० केन प्रसादः कृतस्त द्भूयमेवं विदित्वा यथै
११ व पूर्व्वमाज्ञा श्रवणविधेयास्तथैवावलगनप
१२ राभूत्वा निर्व्वृतविश्वस्ताः सुखं प्रतिवत्स्यथ ये चा
१३ स्मद्वंश्या राजानो भवितारस्तैरपि धर्म्मगुरुभि
१४ र्गुरुकृतप्रसादानुवर्त्तिभिरियमाज्ञा प्रति
१५ पालनीयेति दूतकश्चात्र वभ्रुवर्म्मा[2] ब्रह्मङ्
१६ प्रसादगुप्त वार्त्तं व्यवहरतीति संवत्
१७ ४०० ८० २ श्रावणशुक्लप्रतिपदि

1. Here the village is called Tegvala.
2. Gnoli reads the dūtaka's name as Vaṣtravarmā.

Identical texts recur in 4 other inscriptions found in the same area in the villages of Kisipidi and Balambu with the same date. One lies in the ditch near a *linga* known locally by the name of Luku Mahādeo (hidden Śiva), just outside the village of Balambu. The second was traced in a locality known as Kulachheñtole in the village of Kisipidi across the road west of Balambu. The third which is published by Levi (L 7) is also in the village of Kisipidi. As Gnoli says 'In these last two inscriptions the name of the locality is no longer Sitāṭikā tegvalgrāma but Sitatikatale Kichaprichirgrāma', the latter is applied to Kisipidi, in the Deonani quarter of the village of

Satungal. Gnoli further says 'A comparison of these four inscriptions, which are in a very poor state of preservation, has enabled me to re-establish the text with certainty and fill in Levi's fragmentary reading. The first inscription of this type lies at Hitigā (a ditch of water conduit) in Balambu by the side of the temple of Mahālakṣmī.

XXXIX. Luku Mahādeo Stele of Balambu

(Gn pl. XXI; DV 45; HJ 44) A slab of stone at the site known as Lukumahādeo, a dith outside the village of Balambu. The inscribed part is 46 cm wide and 56 cm long. Date: 482 with the particulars of the preceding record.

१ ॐ स्वस्ति मानगृहाद्वप्पपादानुध्यातो भट्टारक (महाराज)
२ श्रीगणदेवः कुशली शीताटिकातले बु·········ङ्ग्रामे
३ यथाप्रधान ब्राह्मणपुरस्सरान्सर्व्वानेव [कुटुम्बिनः]
४ कुशलम्पृष्ट्वा मानयति पूर्व्वराजभिर्यु [ष्माकं कुथेरशुल्या]
५ धिकरणाभ्यां न प्रवेष्टव्यमित्यनुग्रहः [कृताधुनाम]
६ या सर्व्वदण्डनायक महाप्रतिहार श्रीभौमगुप्त विज्ञा
७ पितेन लिङ्ग्वल्माप्चोकाधिकरणाभ्याम्प (ञ्चापराधद्वारेण च)
८ तुभिरप्यधिकरणैर्न्न प्रवेष्टव्यमिति स्थितिपट्टकेन प्रसादः
९ कृतस्तद्यूयमेवं विदित्वा यथैव पूर्व्वमाज्ञाश्रवणविधेया
१० स्तथैवावलगनपरा भूत्वा निर्व्वृतविश्वस्ताः सुखम्प्रतिवत्स्य (थ)
११ ये चास्मद्वंश्या राजानो भवितारस्तैरपि धर्म्मगुरुभिर्गु (रू)
१२ कृतप्रसादानुवर्त्तिभिरियमाज्ञा प्रतिपालनीयेति दूतक
१३ श्चात्र बव्भ्रुवर्म्मा ब्रह्मङ्प्रसादगुप्तवार्त्ते व्यवहरतीति
१४ श्रावण शुक्ल प्रतिपदि १ संवत् ४०० ८० २

XL. Hiṭigā Stone of Balambu

(DV 46; HJ 48) A slab of stone in the village of Balambu in the courtyard of a water conduit called Hiṭigā. Date: 482 as in the preceding inscription.

In Newari the word *hiṭi* means a water conduit, and *gā* means a ditch or a pothole.

१ ॐ स्वस्ति मानगृहाद् वप्पपादानुध्यातो भट्टारक म
२ हाराज श्रीगणदेवः कुशली शीताटिकातले·········ग्रा
३ मे यथाप्रधानब्राह्मणपुरस्सरान् सर्व्वानेव कु
४ टुम्बिनः कुशलं पृष्टवा मानयति पूर्व्वराजभिर्य्युष्माकं
५ कुथेर शौल्याधिकरणाभ्यां न प्रवेष्ट [व्यमित्य]
६ नुग्रहः कृतकोधुना मया सर्व्वदण्ड [नाय]
७ क महाप्रतिहार श्रीभौमगुप्त विज्ञा [पिते]
८ न लिङ्ग्वल् माप्चोकाधिकरणाम्पञ्चा [पराध]
९ द्वारेण चतुर्भिरप्यधिकरणैर्न्न प्र [वेष्टव्य]
१० मिति स्थितिपट्टकेन प्रसादः कृत [स्तदयूय]
११ मेवम्विदित्वा यथैव पूर्व्वमाज्ञाश्रवण [विधेया]
१२ स्तथैवावलगनपरा भूत्वा निर्व्वृतविश्व [स्ताः]
१३ [सुखं] प्रतिवत्स्यथ ये चास्मद्वंश्या राजा (नो भविता)
१४ [रस्तै] रपि धर्म्मगुरुभिर्ग्गुरुकृत प्र [सादा]
१५ [नुव] र्त्तिभिरियमाज्ञा प्रतिपालनी (येतिदूतक)
१६ [श्चा] त्र बभ्रुवर्म्मा ब्रह्मङ्प्रसाद [गुप्तवार्त्ते]
१७ [व्यवहर] तीति श्रावणशुक्ल प्रतिपदि [सं]वत् ४०० ८० २

In Śrāvaṇa, the 'ṇa' is placed below the line.

XLI. Kisipidi Stone of 482

(L 7; Gn pl. XXIII; DV 47; HJ 50) A slab of stone in Lhatol in Kisipidi (near Thankot) about 6 miles of Kathmandu in the west. The length and breadth of the inscribed part are 47 cm and 35 cm respectively and its date is the same as in the preceding inscription.

१ [ॐ] स्वस्ति मानगृहाद्बप्पपादानु [ध्या]तो भट्टारक
२ महाराज श्रीगणदेवः कुशली शीताटिका
३ तले किचप्रिचिङ्ग्रामे यथा प्रधानब्राह्मण

४ पुरस्सरान्सर्व्वानेव कुटुम्बिनः कुशलम्पृष्ट्वा

५ मानयति पूर्व्वराजभिर्य्युष्मा कं कुथेरशुल्य धिकर

६ णाभ्यान्न प्रवेष्टव्यमित्यनुग्रहः कृतोधुनामया

७ सर्व्वदण्डनायक महाप्रतिहार श्री भौमगुप्त विज्ञा

८ पितेन लिङ्ग्वलमाप्चोका धिकरणभ्या ञ्चापराधद्वा

९ रेण चतुर्भिरप्यधिकरणैर्न्न प्रवेष्टव्यमिति स्थितिप

१० ट्टकेन प्रसादः कृतस्तद्यूयमेवं विदित्वा यथैव पूर्व्वमाज्ञा

११ श्रवणविधेयास्तथैवावलगन [पराभूत्वा निर्व्वृतविश्वस्ताः][1]

१२ सुखम्प्रतिवत्स्यथये चास्मद्वंश्या [राजानो भवितारस्तै]

१३ रपि धर्म्मगुरुभि र्ग्गुरुकृतप्रसादानुवर्त्तिभिरियमा

१४ ज्ञा प्रतिपालनीयेति दूतकश्चात्र बभ्रुवर्म्मा ब्रह्म् ङ्

१५ प्रसादगुप्तवार्त्ते व्यवहरतीति ॥ संवत् ४०० ८० २

१६ श्रावणशुक्ल प्रतिपदि १

1. Conjectural reading based on a similar expression in other inscriptions. DV adopts the same.

XLII. Kisipidi Inscription of 482

(DV 48; HJ 52) A slab of stone lying in the Kulachhen locality of Kisipidi, a village across the road opposite to Balambu. The measurement of the inscribed part is 55 cm long and 43 cm wide but the date is the same as in the preceding stone.

१ [ॐ स्व] स्ति मानगृहाद्बप्पपादानुध्यातो भट्टारक महाराज

२ [श्रीग] णदेवः कु[शली शीता] टिकातले किचिप्रिचिङ्ग्रामे य

३ [था] प्रधान ब्रा [ह्मणपुर] स्सरान्सर्व्वानेव कुटुम्बिनः कु

४ [श] लम्पृष्ट्वा मानयति पूर्व्वराजभिर्युष्माकं कुथेर्शुल्य

५ [धिकर] णाभ्यान्न प्रवेष्टव्यमि [त्य] नुग्रहः कृतकोधुनाम

६ या सर्व्वदण्डनायक महा प्रतिहार श्रीभौमगुप्त

७ विज्ञापितेन [लिङ्ग्वलमाप्चोका] धिकरणाभ्याम्पञ्चापरा

८ धद्वारेण [चतु] र्भिरप्यधिकरणैर्न्न प्रवेष्टव्यमिति

९ स्थितिपट्टकेन प्रसादः कृतस्तद्यूयमेवम्विदित्वा
१० यथैव पूर्व्वमाज्ञाश्रवणविधेयास्तथैवावलगन
११ परा भूत्वा निर्वृतविश्वस्ताः सुखम्प्रतिवत्स्यथ ये चा
१२ स्मद्वंश्या राजानो भवितारस्तैररि धर्म्मगुरुभिर्ग्गु
१३ रुकृतप्रसादानु वर्त्तिभिरियमाज्ञा प्रतिपालनी
१४ या दूतकश्चात्र बभ्रुवर्म्मा ब्रह्मुङ्प्रसादगुप्त
१५ वार्त्ते व्यवहरतीति संवत् ४०० ८० २ श्रावणशुक्ल प्रतिपदि

XLIII Kulāchhetol Stone of Kisipidi

(DV 48; HJ 51; Gn pl. XXII) The stone lies in the Kulachhetol quarter of the village of Kisipidi across the road opposite to Balambur. The text with the date is the same as in the preceding inscriptions. The inscribed part is 55 cm long and 43 cm wide.

१ स्वस्ति मानगृहाद् वप्पापादा [नुध्यातो भट्टारक]
२ [म]हाराज श्रीगणदेवः कुशली शीताटि [कातले]
३ कादुङ्ग्रामे यथाप्रधान ब्राह्मण [पुरस्सरान्]
४ .... पालक कुटूम्बिनः सर्व्वानेव [कुशल]
५ [म्पृष्ट्वा] मानयति विदितम्वोस्तु यथा [मया सर्व्व
६ दण्ड] नायक महाप्रतिहार श्रीभौमगुप्त [विज्ञापि]
७ तेन युष्माकं लिङ्ग्वल्माप्चोकाधि करणाभ्या
८ ....पञ्चापराधद्वारेण न प्रवेष्टव्य [मिति]
९ [स्थितिपट्टकेन] प्रसादः कृतस्तदेवं (विदित्वा)
१० [यथैवपूर्व]माज्ञा श्रवण विधेयास्त (थैवा)
११ [वलगनपरा] भूत्वा निर्व्वृत विश्वस्ता [सुखं प्रति]
१२ [वत्स्यथ ये चा] स्मद्वंश्या [राजा] नो भवितार [स्तैरपि]
१३ [धर्म्मगुरुभि] र्ग्गुरुकृत प्रसादानुवर्त्ति[भिरिय
१४ माज्ञा प्रतिपाल] नीयेति दूतकश्चा [त्र बभ्रु
१५ वर्म्मा ब्रह्मुङ् प्रसाद गुप्त वार्त्ते व्यवहरतीति संवत् ४०० ८० २]
१६ [श्रावण[1] शुक्ल प्रतिपदि]

1. The ण is engraved a little beneath the line.

As it appears the stones are scattered in different villages, which are situated in close proximity to one another in a larger locality called sītāṭikātale (valley). Perhaps the area now covered by the villages of Thankot, Satungal, Kisipidi, Balambu and Chowkitar with the river Balkhu flowing from the northern side below the hills, the river itself forming a bed outskirting the hilly bases, was known as sītaṭīkā and because it was an expansive belt the name *tala* was given to it.

We know that the Chowkitar inscription was addressed to the inhabitants of Tegvalagrāma. But two others are not known fully because of the first letter missing. However, the Kisipidi inscription gives a very meaningful name, Kichaprinching-grāma. The present and past names look similar and one cannot doubt that the present name is derived from kicha-princhigrama but the names appearing in the *Satungal* and *Balambu* stones do not provide a clue to their past names judged from the nature of the present names.

XLIV. The Inscription of Sheraphat (Valley), Noakot

(DV in JNAS) A slab of stone in a field near the confluence of the Trisuli and Tadi rivers in the valley below the Noakot ridge. The top is adorned by a chakra flanked by śankhas. The inscribed part is 34 cm long and 36 cm wide.

१ स्वस्ति मानगृहाद·······
२ ·······भट्टारक महाराज श्रीगण [देव: कुशली]·······
३ ब्राह्मण पुरस्सरान् ग्रामकुटुम्बिन: कुशलमाभाष्य
४ समाज्ञापयति विदितमस्तु भवतां यथा सर्व्वदण्डनायक
५ महाप्रतिहार श्रीभौमगुप्त विज्ञापितेन·······
६ ·······लिङ्ग्वल्माप्चोक·······घिकरणैर्न्न प्रवे(श)
७ ·······करण·······
८ प्रवेशो नास्तु यदा अत्र म·······
९ वाहा ·······आनीयन्ते·······प्रवेश ·······
१० ·······कोट्ट·······निमित्यस्य च

११ प्रसादस्य चिरकालस्थितये शिलापट्टकशासनेन प्र
१२ सादः कृतस्तदेवमवगत्य यूयन्निर्व्वृत विश्वस्ता सुखं
१३ प्रतिवसतेति येपिच मदूर्द्ध्वं राजानो भवितारस्तैरपि
१४ धर्म्मगुरूभि र्ग्गुरूकृत प्रसादानुवर्त्तिभिरियमाज्ञा सम्य
१५ वप्रतिपालनीयेति दूतकश्चात्र सर्व्वदण्डनायक
१६ महाप्रतिहार श्रीभौमगुप्तो वरीवर्त्ति संवत् ४००
१७ ८० ५ कार्त्तिकमासे शुक्ल दिवा द्वादश्याम् १२
१८ राजपुत्र वन्धुजीवे व्यवहरतीति

XLV. Hari-Hara Pedestal Inscription

(Gn XX; DV 50 Sanskrit Sandeśa 1/8; HJ 53) The pedestal of an image of Hari-Hara wrongly known as Uma-Maheśvara in the small garden of a house in Ganchanani near the western gate of Paśupatināth. The inscribed part is about 68 cm wide and 30 cm long. Date: Samvat 489 prathamāṣāḍha śukla 2.

१ ॐ पत्योर्न्नौ पश्य हे श्रीर्य्युगलममिथुनं शूलभृच्छार्ङ्ग पाण्यो रेकैकस्यात्र
किन्तन्न सुकर मनयोस्तौ यदेकत्र पृक्तौ मूर्त्ति त्य....[1]
२ नूनं सखी मदन रिपोरेव मुक्त्वा भवान्या यो दृष्टो जातु तस्मै सततमिह
नमो स्त्वर्द्ध शौरीश्वराय ।। सम्वत् ४०० ८० ७[2] प्रधमा षाढ
३ शुक्ल द्वितीयायाम्भट्टारक महाराजा श्रीगणदेव कालमपरिमितं
समाज्ञापयति परमदैवत श्रीभौमगुप्त पादानुध्यातो विदि
४ त विनयः शाश्वत्कुशलकर्म्मण्युपहित परमानुग्रहः प्रकृष्टकुलजन्मा
दिवमुपगतयोर्म्मातापित्रो रात्मनश्च पुण्योपचितये
५ स्वामिवार्त्तः सकलभुवनसम्भवस्थितिप्रलयकारणमनादिनिधनं भगवन्त
मिह शङ्करनारायणस्वामिनम्प्रतिष्ठापित वानपि च
६ यो सौ सर्व्वत्रिभुवन गुरूः श्रेयसाञ्चाधिवासो यस्मिन्वद्धा नियमित
फलासम्पदः पुण्यभाजाम् । नानारूपम् भुवनमखिलं
७ धार्य्यते येन चेदम् तस्मिन्भक्ति र्न भवति वृथा शुद्धचित्ताशयानाम् ।। भिन्ने
पुंसां जगति च तथा देवता भक्तिभावे पक्षग्राह भ्रमित
८ मनसां पक्ष विच्छित्ति हेतोः इत्यर्द्धाभ्यां समुपरचितं यन्मुरारीश्वराभ्या
मेकं रूपं शरदि जघन श्यामगौरं तदव्यात् ।। पुण्यानि ये

९ प्युभयलोक सुखावहानि कुर्व्वन्ति हि प्रतिदिनं विगताभिभाना: कृत्वापि चेत्त्र विधिवद्विषयोपभोगम् स्वे: कर्म्मभि: सुकृतिनो दिव

१० मा वसन्ति ॥ पुंसां पापकृतामध: सुकृतिना मुर्ध्वगतिर्द्धीमता मित्येवं प्रविचिन्त्य निश्चितमति:[3] सम्प्रज्ञया प्रज्ञया दृष्टादृष्ट

११ विधिप्रयोग निपुणोवार्त्त: स्वपुण्याप्तये मूर्तिङ्के शवशङ्कराद्धं रचिता मस्थापय[4]द्भक्तित:[5] ॥

1. मूर्तित्य is visible but the next 2 letters are worn off, so Gn's त्यत्वके might be correct as DV's त्यागेन ।
2. Gnoli reads 9 but as DV put it the symbol is for 7.
3. Gn निश्चिन्त ।
4. Gn reads स्थापेयद् and thinks that it is a mistake for स्थापयत ।
5. The metres used here are variously स्रग्धरा, मन्दाक्रान्ता, वसन्ततिलका and शार्दूलविक्रीडिता (Sragdharā, Mandākrāntā, Vasantatilakā and Śārdūlavikriḍitā).

XLVI. Chapaligaon Inscription

(L 8; Gn XXI; DV 51; HJ 54) A slab of stone, about 33 cm wide and 75 cm long, standing on the road in the village of Tsapaligaon, about 3 miles north of Kathmandu on the way to Budhānīlakaṇṭha. Its top is decorated with a chakra and two śankhas. Date: Samvat 489 Śrāvaṇa śukla 12. At the present time the stone is totally damaged. My reading is based on the rubbing taken in 1940. The year symbol is clear.

१ [ॐ स्वस्ति] मानगृहाद् वप्पपादानुध्यातो भट्टा

२ रक महाराज [श्री]गङ्गदेव:[1] [कुशली]·······

३ ग्रामनिवासिनो··········

४ ·······मनु·······कुशलम्पृष्ट्वा

५ ·······समाज्ञापयति विदितमस्तु भवता

६ म् [सर्व्व] दण्डनायक महाप्रतिहार श्री [भौ

७ म]गुप्त विज्ञापितेन मया शिला [पट्ट]

८ के[न] प्रसा[द:] कृत स्त·······

९ ....

१० ....

११ ....[प्र] तिमुच्य

१२ ....

१३ ....करणीयमेवं माभूदेवं........वृत्ति [भुजाँ]

१४ मापहानिरिति..

१५ ....

१६ ....करण.................................

१७ ....न प्रवि.................................

१८ चिदपि [2]केश्चित्...............[इ]त्येव म्बिदित्वाद्या

१९ ग्रेन न केनचिदन्यथा करणीयम् यश्चे[3]द

२० मन्यथा कुर्यात् कारयेद्वा तस्याहम कृत्यका

२१ रिणो वाढन्नमर्षयिष्यामीति भट्टारक

२२ पादीयोप्यत्र दूतको वृषकर्म्मा ।। सम्वत्

२३ ४०० ८० ९ श्रावण शुक्ल दिवा द्वदश्याम्[4]

1. L blank, Gn गणदेव but DV reads as गङ्गादेव. However, the much damaged letter does not allow correct reading.
2. Gn दपि f ि....; L....
3. L दन्य व्याकरण ।
4. The readings of L and Gn do not vary except that the conjectural reading of Gn is not to be found in L. But they have read in full only 18-23 lines. DV has tried to fill the gap partly by conjectural reading of the first 7 lines as I have done. My reading is based on the rubbing I took in 1940.

XLVII. Mangal Bazar (Patan) Water Conduit Stone

[DV 52; H. Sakya (Abhilekha Prakāśa, p. 5); HJ 55] A stele in the courtyard of a water conduit behind Manimaṇḍapa. The Manimaṇḍapa is an open platform with wooden pillars in front of a temple of Śiva, which stands by the right side of Bhimsena temple in Mangal Bazar, Patan. My reading is based on a rubbing taken in 1940. The date is *492 Vaiśākha śukla 13*.

The inscribed part is 25 cm wide and 20 cm long. The verses are all in Śārdūlavikriḍita metre.

१ ········प्रलयसम्भव कारणस्य········कृतेस्तरूपा[1]········
२ स्याति············भवो दिशतु सन्तत मिष्टमी[शः]
३ नित्यं ख्यात गुणप्रभाव[2]········वंशेपि लब्धास्पदे[3]········
४ जातस्यात्र जनस्य जन्म विफलं कीर्त्त्या विना जीवितः
५ दृष्टं सौख्यवताम्परत्र च सुखं प्राप्नोति········कीर्त्त्या मया
६ तां कर्त्तुं न समुत्सुकः प्रयतते को नाम मूढः स्वय [म्]
७ कीर्त्तेः फलं स किल भारविरित्यवेक्ष्य मानुष्यकं क्षणिकमर्त्थवताञ्चल [ग्नः][4]
८ मातापितृस्वकृत[5]पुण्यविवर्द्धनार्त्थं मेतां भिषग्प्रण्य[6]चकार की[र्त्तिम्]
९ [7]अक्षयणीयार्त्थञ्च यूपग्रामस्य दक्षिण पश्चिमेन
१० क्षेत्रं दत्तंयस्य पिण्डकं विंशिकया मानिकाः पञ्चाशदिति[8]
११ संवत ४०० ९० २ वैशाखशुक्लदिवा १० ३

1. DV reads स्तम्भा कृते स्तरूण ।
2. DV adds चरिते after प्रभाव ।
3. DV correctly adds स्पदे ।
4. DV omits ल[ग्नः] ।
5. DV reads स्वकृत rightly but H. Sakya reads सुकृत ।
6. DV भिषग्-प········चकार ।
7. DV's reading is correct.
8. DV's reading is correct.

XLVIII. Inscription of Sikubahi

(DV 53; HJ 56) The pedestal of an image of Umā-Maheśvara lying near the confluence of the river Bagmati and Maṇimati (Manoharā) at a site called Sikubahi (but there is no trace of Bahi, i.e. vihāra, here). Date 495 without particulars. The inscribed part is 76 cm wide and 28 cm long.

१ ॐ बहिर्देशाद्दक्षिणस्यां राजपुत्र वज्ररथनाम्नो··········
२ आसीत्तद्गोत्रजेनैकेन याश्च वाग्वत्या मणिमत्याश्च सन्धिदेशे··········
३ मातरः स्थापिता आसन् मृन्मयास्ताः कालक्रमेण चिरन्तनतयाति विशीर्ण्ण
भग्नपतित पाणिपादा जाता इत्थम्भूताश्च तामवलोक्य[1]··········

४ नेन च पश्चात्परम धार्म्मिकेन बञ्भ्रु बर्म्मनाम्नासामेव मातृणाम्प्रति संस्कार क्रिया चिन्तितनतमासीदसम्भाव्यैव ताङ्क्रियां स काल धर्म्मवंशं····

५ फलोपभुक्तयेदिवन्नीतवां तदधुना[2] तद् भ्रातुष्पुत्रस्य नित्य धर्माभिरत चेतस्कस्य परम भागवतस्य देशवर्म्मनाम्नो मात्रा पतिव्रतया

६ धर्म्मिष्ठया देशभट्टारिकया तस्यैव कालगतस्य बञ्भ्रुवर्म्मण: स्वर्ग्गानन्त्याय मातापित्रोर्भर्त्तु श्चात्मनश्च[3] पुण्याभिवृद्धये पुनरन्यथा

७ देव्यो मातर: शैल्या: कारिता इति संवत्वर्षशत[4] ४०० ९० ५

1. DV ता अवलोक्य ।
2. स is not there, but DV puts (स) after तवां ।
3. DV रा in place of श्चा ।
4. DV संवत् वर्ष ।

XLIX. Viṣṇupāduka Stele

(DV 54; HJ 57) A stele at the foot hill near Budhanilakantha in the upper reach of the Visnumati river as it touches the slightly raised ground above the even ground level of the Valley. The stele is in the same spot as the Śivalinga inscription. The initial few lines and the top are lost. The inscribed part covers a space of 25 cm wide and 64 cm long. The date is 512 Jyeṣṭha śukla 10. This is the first inscription of Śivadeva I's reign without Amśuvarmā's presence in it but with Bhaumagupta who seems to have continued as Chief Minister. The passage in verse is in Sragdharā metre.

१ ···

२ ················लाकुलाङ्ग················

३ श्री जम्मीजनिकर·············ल···············

४ ···लर्ि···व्जाजिविलासैरलसमृदुगति र्व्वासुदेव: स पातु

५ विद्यात्मरूपम्भवभयशमनङ्कोटिसंसर्ग्गमाद्य [म्]

६ [स] र्व्वाकारं दृढन्तम्पुनरणुमनयं सर्व्वकल्पव्यतीतम्

७ दुर्भी क्षेण········दमित रजसो वेधस: संश्रयी[1][य:]

८ ····वासन्तेनै स जयति सततं विश्वधामा स्मरारिः

९ [स्वस्ति मा] नगृहाद्बप्पपादानुध्यातस्सततमुपचीयमान

१० [शशाङ्क] किरणामलयशः प्रतानो लिच्छविकुलकेतु

११ [भट्टारक महा] राज श्रीशिवदेवः कुशली थंतुरीद्रङ्ग

१२ [प्रधानपुर] स्सरान्ग्राम कुटुम्बिनः कुशलमाभाष्य समा

१३ [ज्ञापयति] विदितमस्तु वो यदे तत्पूर्वराजैरस्य द्रङ्ग

१४ ····[उ] प कर्म्मपरितुष्टेन मल्लकर करणीयङ्कार्षा

१५ [पणा] दूद्ध्वंन ग्रहीनव्यमिति प्रसादः कृत····देयं[2]

१६ प्रसादस्य दृढीकरणार्थं सर्व्वदण्डनायक महाप्रतीहार[3]

१७ [4]श्री भौमगुप्त विज्ञापितेन मया शिलापट्टकेन प्रसादः

१८ कृतः इति समाज्ञापना दूतकश्चात्र महाबलाद्ध्यक्ष

१९ कुल प्रवीरः इति।। संवत् ५०० १० २ ज्येष्टशुक्ल दशम्याम्

1. DV adds [यः] hereafter.
2. DV omits देय ।
3. DV reads र in the next line.
4. DV omits श्री and thinks that Bhaumagupta enjoyed a less important status than earlier. But श्री is there, which goes to refute DV's theory.

L. Inscription of Chapagaon

(Gn XXXII; DV 55; HJ 58) A slab of stone standing on the main road in the village of Chapagaon near the temple of Vajra Vārāhī, south of Patan, on the way to Lele. The stone goes without the top as it is broken. The date is effaced. The inscribed part is 48 cm wide and 86 cm long. A few lines in the mid portion are also damaged.

१ स्वस्ति मानगृहादपरिमितयशाः[बप्पपादानुध्यातो लिच्छविकु]ल

२ लकेतुर्भट्टारक महाराज श्रीशिवदेवः [कुशली····नि]

३ वासिनाः प्रधान पुरस्सरा न्कुटुम्बिनः कुशलमा [भाष्य] समाज्ञाप

४ यति विदितम्भवतु भवताम् यथेह[1] [स्थरु] द्रङ्गे·······
५ मत्स्योपक्रयङ्कृत्वा प्रतिनिवर्त्तमानानामेकस्य पु········
६ शुल्कापह्लासेन काष्ठिकामत्स्यभारक एकस्मिंश्च त···[ताम्रि]
७ कपणत्रयञ्च भुक्कुण्डिका मत्स्य भारके दशभुक्कुण्डिका········
८ त्रिपणाः राजग्रीवके दशराज ग्रीव मत्स्याः पणात्र (यं)
९ रीमत्स्य भारके·······त्रिपणाः मुक्ता मत्स्यभारके
१० यम्····पञ्चाशत्तम[2] शुल्क न्तदस्य········
११ केतु···········कल्य प्राङ्नृपतिभि·······
१२ ············व्यापियश········
१३ ···········म स्मि न्प्रसादे
१४ ···········कोवेकै····प········
१५ ···········[चिरकाल] स्थितये चारस्य प्र [सा]
१६ दस्य········[शिलापट्टन] शासनमि दम् दत्तम्
१७ ············र भाविभिश्चायम्
१८ प्रसादः·········[भूप] तिभिर्द्धर्म्मगु
१९ रूभिर्गुरू [कृतप्रसादनुवर्त्तिभि रियमाज्ञा सम्यक्यालनीये]ति समाज्ञापना
२० दूतकाश्चात्र···········वैशाख शुक्ल पञ्चम्याम्

1. DV स्थरूद्रङ्गे, but letters are damaged. Gn ········द········
2. DV [प]ञ्चाशत्तमशुल्क ·· etc, but Gn त्त्रमशुल्कन्तदस्य ।

LI. The Chyasaltol (Patan) Stele

